# Newton's Academy संस्कृतम्

अवधिः होरात्रयम् | गुणाङ्काः 80

**सूचनाः**

1. सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।
2. यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्याः।
3. आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम्।

## प्रथमः विभागः- सुगमसंस्कृतम्। (8)

**1. (अ) चित्रं दृष्ट्वा नामानि लिखत। (5 तः 4)** **[4]**

(1) 

(2) 

(3) 

(4) 


(5) 

**(आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत। (3 तः 2)** **[2]**

(1) ६८ (2) नवसप्ततिः (3) १२

**(इ) समय-स्तम्भमेलनं कुरुत।** **[2]**

| | 'अ' | 'आ' |
|---|---|---|
| (1) | दशोन-षड्वादनम् | १०.०५ |
| (2) | पञ्चविंशत्यधिक-द्विवादनम् | ०८.१५ |
| (3) | सपाद-अष्टवादनम् | ०५.५० |
| (4) | पञ्चाधिक-दशवादनम् | ०२.२५ |

## द्वितीयः विभागः- गद्यम्। (20)

**2. (अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** **[7]**

शिबिरस्य प्रथमदिने एव भोजनादिकं समाप्य मध्याह्ने बालैः सह पत्रक्रीडायां मग्नः आसम् अहम्। तदा सद्यः एव परिचितः प्रोफेसर-सर्कसवाले (सर्कस-क्रीडारङ्गस्य स्वामी) मामेव अन्विष्यन् तत्र समागतः। "कॅप्टनसाहेब, शृणोतु कॅप्टनसाहेब! अस्माकं सर्कसक्रीडायां कतिपयेभ्यः मासेभ्यः लोकप्रियः सहभोजनकार्यक्रमः प्रचलति। गौः, भल्लूकः व्याघ्रश्च इत्येतेषां पशूनाम् अयं कार्यक्रमः प्रयोगस्य सर्वोच्चम् आकर्षणम् अस्ति। तथा विज्ञापनं कृत्वा प्रवेशपत्राणि अपि विक्रीतानि। परन्तु व्याघ्रभल्लूकयोः कलहकारणात् द्वावपि व्रणितौ।" "किं प्राणिनोः कलहः?" "महाशय, अस्माकं सर्कसक्रीडायां तु व्याघ्रभल्लूकौ द्विपादौ एव।" एवं प्राध्यापकमहाशयेन रहस्यभेदः कृतः। "नास्ति अस्माकं सामर्थ्यं व्याघ्रं वा भल्लूकं वा पालयितुम्। क्रीडायां द्वौ बहुरूपधारिणौ नरौ एव व्याघ्रं भल्लूकं च नाटयतः।" "किं धेनुरपि...?" "नहि नहि, धेनुस्तु वास्तविकी एव।" "हंऽऽ.. कथयतु तर्हि किं मया करणीयम् अत्र?" "अहं प्रार्थये यत् भवतः बालवीरचमूतः कौ अपि द्वौ सैनिकौ अद्यतनक्रीडायां यदि व्याघ्रभल्लूकवेषौ धृत्वा प्रेक्षकाणां मनोरञ्जनं कुर्यातां तर्हि महान् उपकारः स्यात्। कृपया साहाय्यं करोतु।"

NEWTON'S ACADEMY

**(1) अवबोधनम्। (4 तः 3)** **3**

(क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत। 1

(1) तथा विज्ञापनं कृत्वा ................ विक्रीतानि। (प्रवेशपत्राणि / पिहितपत्राणि)

(2) अस्माकं सर्कसक्रीडायां तु व्याघ्रभल्लूकौ ................ एव। (चतुष्पादौ / द्विपादौ)

(ख) कः कं वदति? 1

"किं प्राणिनोः कलहः?"

(ग) पूर्णवाक्येन उत्तरं लिखत। 1

चिमणरावः कस्यां मग्नः?

(घ) अमरकोषात् शब्दं योजयित्वा वाक्य पुनर्लिखत। 1

धेनुः तु वास्तविकी एव।

**(2) शब्दज्ञानम्। (3 तः 2)** **2**

(क) पूर्वपदं लिखत। 1

(1) व्याघ्रश्च = ............ + च।

(2) द्वावपि = ............ + अपि।

(ख) विशेषण-विशेष्ययो मेलनं कुरुत। 1

| | 'अ' | 'आ' |
|---|---|---|
| (१) | सर्वोच्चम् | नरौ |
| (२) | बहुरूपधारिणौ | सैनिकौ |
| | | आकर्षणम् |

(ग) गद्याशांत् २ पूर्वकालवाचक-त्वान्त-अव्यये चित्वा लिखत। 1

**(3) पृथक्करणम्।** **2**

क्रमेण योजयत।

(1) शिबिरस्य प्रथमं दिनम्।

(2) सर्कसस्वामिनः साहाय्ययाचना।

(3) सहभोजनस्य रहस्यभेदः।

(4) सर्कसस्वामिनः आगमनम्।

**(आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** **[7]**

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः। सः ग्रामः पूर्णानदीतीरे वर्तते। तत्र जगद्गुरोः शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत्। तस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम्। बाल्ये एव तस्य पिता शिवगुरुः दिवङ्गतः। तस्माद् मातैव पुत्रस्य पालनम् अकरोत्। पञ्चमे वयसि उपनीतः सः पठनार्थं गुरुमुपागच्छत् । तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान्। पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान्। गृहं प्राप्य मातृसेवाम् आरभत च। माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म। परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः संन्यासार्थम् अनुमतिं प्रार्थयत। शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता।

**(1) अवबोधनम्। (4 त: 3)** **3**

(क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत। 1

शङ्करस्य माता एव पुत्रस्य पालनम् अकरोत् यत: ............... ।

(1) बाल्ये एव शङ्करस्य पिता दिवङ्गत:।

(2) शङ्करस्य पिता विदेशं गत:।

(ख) पूर्ण वाक्येन उत्तरं लिखत। 1

किं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता?

(ग) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। 1

पञ्चमे वयसि स: उपनीत:।

(घ) एष: गद्यांश: कस्मात् पाठात् उद्धृत:। 1

**(2) शब्दज्ञानम्। (3 त: 2)** **2**

(क) प्रश्ननिर्माणं कुरुत। 1

माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म।


(ख) गद्यांशात् 2 द्वितीया-विभक्त्यन्तपदे चित्वा लिखत। 1

(ग) लकारं लिखत। 1

शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत्।

**(3) पृथक्करणम्।** **2**

**जालरेखाचित्रं पूरयत।**




**(इ) माध्यमभाषया सरलार्थं लिखत। (2 त: 1)** **[4]**

(1)

कर्ण: – तेन हि जित्वा पृथिवीं ददामि।
शक्र: – पृथिव्या किं करिष्यामि? नेच्छामि कर्ण, नेच्छामि।
कर्ण: – अथवा मच्छिरो ददामि।
शक्र: – अविहा। अविहा।
कर्ण: – न भेतव्यम् न भेतव्यम्। अन्यदपि श्रूयताम्। अङ्गै: सहैव जनितं कवचं कुण्डलाभ्यां सह ददामि।
शक्र: – (सहर्षम्) ददातु, ददातु।

(2)

कीर्तनकार: – शृणुत आर्या: शृणुत। अतिप्राचीना खलु एषा कथा। अस्ति विश्वामित्र: नाम कुशिकपुत्र: मुनिवर:। सपरिवारं, सगोधनं स: दूरत: आगत:। मार्गम् आक्रामन् स: विपाट् तथा शुतुद्री एतयो: नद्यो: सङ्गमं प्राप्त: ।

**(ई) माध्यमभाषया उत्तरं लिखत। (2 त: 1)** **[2]**

(1) संस्कृताध्ययनम् अन्यक्षेत्रेषु कथम् उपयुक्तम्?

(2) काकेन क: उपाय: उक्त:?

NEWTON'S ACADEMY

## तृतीय: विभाग:- पद्यम्। (18)

3. (अ) **पद्यांशं पठित्वा निर्दिष्टाः कृती: कुरुत।** [4]

> वैद्यराज नमस्तुभ्यं यमराजसहोदर।
> यमस्तु हरति प्राणान् त्वं तु प्राणान् धनानि च।।
>
> यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
> निरस्तपादपे देशे एरण्डोऽपि द्रुमायते।।
>
> सा गृहीताऽतिचुक्रोश रावणेन यशस्विनी।
> रामेति सीता दु:खार्ता रामे दूरगते वने।।
>
> सा तदा करुणा वाचो विलपन्ती सुदु:खिता।
> वनस्पतिगतं गृध्रं ददर्शायतलोचना।।

**(1) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। (3 त: 2)** **2**

**(क) पूर्णवाक्येन उत्तरं लिखत।** 1

वैद्य किं किं हरति?


**(ख) विशेषण-विशेष्ययो: मेलनं कुरुत।** 1

| | 'अ' | | 'आ' |
|---|---|---|---|
| (1) | निरस्तपादपे | (i) | अल्पधी: |
| (2) | श्लाघ्य: | (ii) | एरण्ड: |
| | | (iii) | देशे |

**(ग) सन्धिविग्रहं कुरुत।** 1

एरण्डोऽपि = ............ + ............

**(2) जालरेखाचित्रं पूरयत।** **2**




(आ) **माध्यमभाषया उत्तरं लिखत। (2 त: 1)** **[2]**

(1) 'न्याय्यात्पथ: प्रविचलन्ति पदं न धीरा:' इति सुक्तिं स्पष्टीकुरुत।

(2) 'रे रे चातक' इति श्लोक माध्यमभाषया स्पष्टीकुरुत।

(इ) **पद्ये शुद्धे पूर्णे च लिखत। (क, ख त: 1, ग, घ त: 1)** **[6]**

(1) (क) प्रथमवयसि पीतं .......................... ।

.......................... साधवो विस्मरन्ति।।

**अथवा**

(ख) अयं न .......................... ।

.......................... निर्धनो वा।।

NEWTON'S ACADEMY

(2) (ग) यादृशं वपते ........................... ।
........................... लभते फलम्।।

**अथवा**

(ख) राक्षसेभ्य: सुतां ........................... ।
........................... स पण्डित:।।

**(ई) अन्वयं पूरयत।** **[2]**

पुरुष: ........................... भिन्द्यात् पटं ........................... रासभरोहणं (अपि) कुर्यात् येन केन ........................... (स:) ........................... भवेत् ।

**(उ) माध्यमभाषया सरलार्थं लिखत। (3 त: 2)** **[4]**

(1) वाल्मीकिव्यासबाणाद्या: प्राचीना: कविपण्डिता:।
तान् शिक्षयन्ति सततं ये सदा वाचने रता:।।

(2) वृथाभ्रमणकुक्रीडापरपीडापभाषणै:।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत्।। 2

(3) यथा प्रकाशयत्येको भानुर्भुवनमण्डलम्। 2
धर्मान् प्रकाशयत्येकस्तथा मानवतागुण:।।

## चतुर्थ: विभाग:- लेखनकौशलम्। (9)

**4. (अ) धातूनाम् अव्ययानां च विशिष्टविभक्ते: उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (6 त: 4)** [4]

(क) रुच् (1 आ.प.) (ख) स्निह् (4 प.प.) (ग) वि + रम् (1 प.प.)
(घ) कृते (च) सह (छ) उभयत:

**अथवा**

**संस्कृतानुवादं कुरुत। (6 त: 4)**

(1) विद्यार्थी पुस्तके वाचतात.
छात्र किताबें पढ़ते हैं।
Students read the books.

(2) तुझी परीक्षा कधी आहे?
तुम्हारी परीक्षा कब है?
When is your examination?

(3) झाड़ावर माकडे बसतात.
पेड़ पर बंदर बैठते हैं।
Monkeys sit on the tree.

(4) आई दरवाजा उघडते.
माँ दरवाजा खोलती है।
Mother opens the door.

(5) तू चित्र काढ.
तुम चित्र बनाओ।
You draw a picture

(6) मी काल हत्ती पाहिला.
मैंने कल हाथी को देखा।
Yesterday I saw an elephant.


NEWTON'S ACADEMY

(आ) 5/7 वाक्यात्मकं निबन्धं लिखत। (3 त: 1) [5]

(1) मम प्रिय: कवि:। (2) मम प्रिय: पुस्तकम्। (3) मम प्रिय: खग।

**अथवा**

**साहाय्यक-शब्दानाम् आधारेण 5 / 7 वाक्यात्मकं चित्रवर्णनं कुरुत।**




(मञ्जूषा- क्रीणाति, गच्छति, वदति, विक्रीणाति, तिष्ठति, पश्यति, खादति, आस्वादयति)

**पञ्चम: विभाग:- भाषाभ्यास:। (17)**

**5. (अ) तालिकापूर्तिं कुरुत।** **[8]**

**(1) नामतालिका। (6 त: 4)** **2**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| शशिनि | ........................... | ........................... | सप्तमी |
| ........................... | वारिभ्याम् | ........................... | चतुर्थी |
| ........................... | ........................... | पितृणाम् | षष्ठी |

**(2) सर्वनामतालिका। (6 त: 4)** **2**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| मम/मे | ........................... | ........................... | षष्ठी |
| ........................... | ........................... | ताभ्य: | पञ्चमी |
|  | इमौ | ........................... | प्रथमा |

(3) **क्रियापदतालिका। (6 त: 4)** 2

| लकार: | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: |
|---|---|---|---|---|
| विधिलिङ् | स्पृहयेत् | ........................ | ........................ | प्रथम: |
| लोट् | ........................ | नृत्यतम् | ........................ | मध्यम: |
| लट् | | ........................ | पठाम: | उत्तम: |

(4) **धातुसाधित-विशेषण-तालिका। (6 त: 4)** 2

| शतृ/शानच् | धातु: | क्त | क्तवतु | कृत्या: |
|---|---|---|---|---|
| पूजयन् | पूज् (10 प.प.) | .................. | पूजितवान् | .................. |
| .................. | खाद् (1 प.प.) | खादित: | .................. | खाद्य: |
| रममाण: | रम् (1 आ.प.) | .................. | रतवान् | .................. |

(आ) **निर्दिष्टा: कृती: कुरुत। (4 त: 3)** [9]

(1) **योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत। (5 त: 3)** 3

(क) .................. (4) वेदा: वर्तन्ते। (सङ्ख्यावाचकम्)

(ख) .................. (2) भवने योगेश: निवसति। (क्रमवाचकम्)

(ग) वर्षस्य.................. (4) परीक्षा भवति। (आवृत्तिवाचकम्)

(घ) अहं दिनस्य .................. (2) अध्ययनं करोमि। (आवृत्तिवाचकम्)

(च) अस्ति .................. (1) चम्पकं नाम अरण्यम्। (सङ्ख्यावाचकम्)

(2) **समासानां तालिकापूर्तिं कुरुत। (5 त: 3)** 3

| | समस्तपदम् | विग्रह: | समासनाम |
|---|---|---|---|
| (क) | परमाणु: | परम: अणु:। | ..............................। |
| (ख) | .............................. | शुका: च सारिका: च। | इतरेतर-द्वन्द्व:। |
| (ग) | समुद्रसुता | ..............................। | षष्ठी-तत्पुरुष:। |
| (घ) | यथाक्रमम् | क्रमम् अनुसृत्य। | ..............................। |
| (च) | अनिच्छा | ..............................। | नञ्-तत्पुरुष:। |

(3) **समानार्थकशब्दान्/विरुद्धार्थकशब्दान् लिखत। (5 त: 3)** 3

(क) नीरजम् = ........................। (ख) लघु: × ........................।

(ग) दन्ता: = ........................। (घ) उत्सुका: × ........................।

(च) सुगम: = ........................।

(4) **सूचनानुसारं कृती: कुरुत। (5 त: 3)** 3

(क) सुदास: सुगतचरणाभ्यां कमलं समर्पितवान्। (वाच्यपरिवर्तनं कुरुत।)

(ख) आचार्य: शिष्यगणेन सह गङ्गास्नानार्थं गच्छति स्म। ('स्म' निष्कासयत।)

(ग) त्वं द्रष्टुं शक्नोषि। ('त्वं' स्थाने 'भवान्' योजयत।)

(घ) वयम् आनन्देन एकत्र निवसाम:। (वाक्यं लङ्लकारे परिवर्तयत।)

(च) यानं चलति। (णिजन्त कुरुत)

## षष्ठ: विभाग:- अपठितम्। (8)

**6. (अ) गद्यांशं पठित्वा कृती: कुरुत। (6 त: 4)** [4]

> आसीत् एक: भिक्षुक:। स: प्रतिदिनं भिक्षाटनमाचरति स्म। तस्य समीपे केवलमेकं ताम्रभाजनमासीत्। कदाचित् काचित् गृहिणी आगच्छति अन्नं च यच्छति। अन्यस्मात् गृहात् कदाचित स: वस्त्रमपि लभते। स: अन्नं भक्षयति वस्त्रपरिधानं च करोति। एवमेव यथाकथचित् गच्छति काले एकदा एका बालिका तस्मै एकं नाणकमयच्छत्। स: तन्नाणकं ताम्रभजने अस्थापयत्। तदनन्तरं यदा यदा स: नाणकं प्राप्नोत् तदा स: तत् ताम्रपात्रे एव स्थापितवान्। कतिपयै: दिनै: ताम्रभाजनं नाणकै: पूर्णमासीत्। अधुना द्रव्येणानेन काशीयात्रां करोमि इति चिन्तयित्वा भिक्षुक: काशीं गत:।

**(1) पूर्णवाक्येन उत्तरं लिखत।** 1

भिक्षुकस्य समीपे किं आसीत्?

**(2) प्रातिपदिकं लिखत।** 1

(क) नाणकै: (ख) तस्मै

**(3) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।** 1

भिक्षुक: द्रव्येणानेन केदारनाथयात्रां करोति।

**(4) माध्यमभाषया सरलार्थं लिखत।** 1

स: प्रतिदिनं भिक्षाटनमाचरति।

**(5) गद्यांशात् लट्-लकारस्य क्रियापदं चित्वा लिखत।** 1

**(6) कारकपरिचयं कुरुत।** 1

<u>गृहात</u> कदाचित् स: वस्त्रमपि लभते।

**(आ) (1) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।** [2]

> सुवर्णं हि यथा श्रेष्ठ सर्वधातुषु गण्यते।
> तथा गुणेषु सर्वेषु सौजन्य श्रेष्ठमुच्यते।।1।।
>
> उद्बोधकं प्रेरकं च रञ्जकं ज्ञानदं तथा।
> चतुर्विधं हि वक्तृत्वं सर्वमेकत्र दुर्लभम्।।2।।

**(क) पूर्णवाक्येन उत्तरं लिखत। (2 त: 1)** 1


(1) सर्वधातुषु किं श्रेष्ठमुच्यते?

(2) सौजन्यं केषु श्रेष्ठमुच्यते?

**(ख) समानार्थकं शब्दं लिखत।** 1

सुवर्णम् = .......................... ।

**(आ) (2) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** [2]




NEWTON'S ACADEMY